# श्रीसोमनाथसंस्कृतयुनिवर्सिटी, वेरावलम्

## सत्रान्तपरीक्षा, नवम्बर/दिसम्बर-२०१६

| | | |
|---|---|---|
| **कक्षा- आचार्य-१ (SEM-1)** | **प्रश्नपत्र-५** | **गुणा: - ७०** |
| **विषय:- प्राचीनराजनीतिशास्त्रम्** | **CE411** | **समय: - ०३ त: ०६** |
| **दिनाङ्क: - ०९/१२/२०१६** | **सन्दर्भग्रन्थ: -मनुस्मृति: ( सप्तमोऽध्याय: )** | |

**॥ प्रथमान्विति: ॥**

**प्र-१ कस्याप्येकस्य ससन्दर्भप्रसङ्गपूर्वकं संस्कृते व्याख्या कार्या । ०४**

१. अराजके हि लोकेऽस्मिन् सर्वतो विद्रुते भयात् ।
रक्षार्थमस्य सर्वस्य राजानमसृजत् प्रभु: ॥

२. यस्य प्रसादे पद्मा श्रीर्विजयश्च पराक्रमे ।
मृत्युश्च वसति क्रोधे सर्वतेजोमयो हि स: ॥

**प्र-२ अधोलिखितेषु कस्याप्येकस्य विस्तरेणोत्तरं लिखत । १२**

१. राज्ञ: कर्तव्यानि लिखन्तु ।

२. अधर्मदण्डने राजादीनां दोष: ।

**प्र-३ टिप्पणीद्वयं लिखत । ०४**

१. अविनयनिन्दा ।

२. व्यसननिन्दा ।

३. मन्त्रिभि: सह विचार्य स्वहितं कार्यम् ।

**॥ द्वितीयान्विति: ॥**

**प्र-४ एकस्य ससन्दर्भप्रसङ्गपूर्वकं संस्कृते व्याख्या कार्या । ०४**

१. नित्यं तस्मिन् समाश्वस्त: सर्वकार्याणि निक्षिपेत् ।
तेन सार्धं विनिश्चित्य तत: कर्म समारभेत् ॥

२. दूत एव हि सन्धत्ते भिनत्त्येव च संहतान् ।
दूतस्तत्कुरुते कर्म भिद्यन्ते येन मानवा: ॥

**प्र-५ एकस्य सविस्तरेणोत्तरं लिखत । ०८**

१. अमात्यानां नियुक्ति: प्रतिपादनीया ।

२. दुर्गप्रकारा: वर्णनीया: ।

**प्र-६ त्रयाणामुत्तरं लेखनीयम् । ०३**

१. अनुरक्त: शुचिर्दक्ष: क: राज्ञ: प्रशस्यते ?

२. अमात्ये सेनापतौ क: राज्ञ: प्रशस्यते ?

३. सन्धिविपर्ययो क: कुशल: भवति ?

४. गुरुकुलाद् आवृत्तानां विप्राणां पूजकः कः भवेत् ?

५. नित्यं विवृतपौरुषः कः भवेत् ?

**॥ तृतीयान्वितिः ॥**

**प्र-७ एकस्य ससन्दर्भप्रसङ्गपूर्वकं व्याख्या विधेया ।** **०४**

१. ग्रामस्याऽधिपतिं कुर्याद् दशग्रामपतिं तथा ।
विंशतीशं शतेशं च सहस्रपतिमेव च ॥

२. संरक्ष्यमाणो राज्ञा यं कुरुते धर्ममन्वहम् ।
तेनाऽऽयुर्वर्धते राज्ञो द्रविणं राष्ट्रमेव च ॥

**प्र-८ एकस्य सविस्तरेणोत्तरं लिखत ।** **०८**

१. ग्रामपत्याऽधिपत्यादीनाम् विषयः विवेचनीयः ।

२. सन्धिविग्रहादीनां प्रकारः वर्णनीयः ।

**प्र-९ अधोलिखितेषु त्रयाणामुत्तराणि दातव्यानि ।** **०३**

१. स्थाकर्मानुरूपतः वृत्तिं प्रत्यहं कः कल्पयेत् ?

२. कयोः पञ्चाशत्तमो भागः राज्ञा आदेयः ?

३. क्षीणधनोऽपि राजा कस्मात् करं न गृह्णीयात् ?

४. प्रजानामेव पालनं कस्य धर्मः ?

५. समीपतमं राजानं किं विद्यात् ?

**॥ चतुर्थान्वितिः ॥**

**प्र-१० एकस्य ससन्दर्भप्रसङ्गपूर्वकं संस्कृते व्याख्या कार्या ।** **०४**

१. यदा परबलानां तु गमनीयातमो भवेत् ।
तदा तु संक्षयेत् क्षिप्रं धार्मिकं बलिनं नृपम् ॥

२. मार्गशीर्षे शुभे मासि यायात् यात्रां महीपतिः ।
फाल्गुनं वाऽथ चैत्रं वा मासौ प्रति यथाबलम् ॥

**प्र-११ एकस्य विस्तृतमुत्तरं लिखत ।** **१२**

१. परराष्ट्रपीडाविधानं विस्तृतं वर्णयत ।

२. शत्रुमित्रयोः गुणधर्माः वर्णनीयाः ।

**प्र-१२ द्वयोः लघूत्तराणि लिखत ।** **०४**

१. व्यवहारः कीदृशः अपेक्षितः भवति ?

२. कीदृशीं कन्याम् उद्वहेत् ?

३. राज्ञा कति सचिवाः प्रकर्तव्याः ?

---